# वैयाकरणसिद्धान्तकौमुदीस्थं
# कारक-प्रकरणम्

प्रस्तोत्री - डॉ. लक्ष्मी शर्मा
( गौविन्दं संस्कृतसदः )

# सम्बोधने प्रथमा – सम्बोधने च (पा. सू.)

- सम्बोधनम् = अभिमुखीकरणम्
- सम्बोधने च = 'प्रातिपदिकार्थे सति सम्बोधनाधिक्ये गम्येऽपि प्रथमा' इति सूत्रार्थः।
- उदाहरणम् = हे राम! मां पाहि।
  हे राजन्! सार्वभौमो भव।
- सम्बोधनविभक्तिविषये नियमः –

**इयम् अनुवाद्यविषया न तु विधेयविषया।**

अर्थात् '**हे राजन् सार्वभौमो भव**' इति वाक्ये राज–सार्वभौम–शब्दाभ्यां बोध्यः एक एवास्ति परन्तु यथा राजशब्दात् सम्बोधने प्रथमा, न तथा सार्वभौमशब्दात्। सार्वभौमत्वस्य विधेयत्वात्।

# कारक–संज्ञा

कर्तृ–कर्मप्रभृति–संज्ञाविधायकेषु सूत्रेषु सर्वत्र 'कारकम्' इत्यधिक्रियते–

**कारके**

इदम् अधिकारसूत्रम्। अत्र प्रथमार्थे सौत्री सप्तमी, तेन कर्तृ–कर्मादिसंज्ञाविधायकानां सूत्राणाम् ''कारकं सत् कर्तृसंज्ञकम्, कारकं सत् कर्मसंज्ञकम्'' इत्याद्यर्थो भवति।


कर्मकारकम्
ईप्सिततमम्
कर्म
अनीप्सितम्
१. निर्वर्त्यम् २. विकार्यम्
३. प्राप्यम्
१. औदासीन्येन प्राप्तम् २. कर्तुरनीप्सितम्
३. संज्ञान्तरैरनाख्यातम् ४. अन्यपूर्वकम्

# ईप्सिततम-अनीप्सितयोः भेदाः

ईप्सितं कर्म

१. निर्वर्त्यम्- प्रकृत्युच्छेदसम्भूतम्- घटं करोति

२. विकार्यम्- किञ्चिद्गुणान्तरोत्पत्त्या- सुवर्णं कुण्डलं करोति

३. प्राप्यम्- कर्तुः क्रियया कृतम्- घटं पश्यति

अनीप्सितं कर्म

१. औदासीन्येन यत् प्राप्तम्- ग्रामं गच्छन् तृणं स्पृशति।

२. कर्तुरनीप्सितम् ( द्वेष्यम् )- ओदनं भुञ्जानो विषं भुङ्क्ते।

३. संज्ञान्तरैरनाख्यातम्- गां दोग्धि पयः।

४. अन्यपूर्वकम्- क्रूरम् अभिक्रुध्यति।
( क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः )

अहं कार्यं करोमि।

मया कार्यं क्रियते।

गोपालः मम गां पयः दोग्धि

# कर्मसंज्ञा

षट्सु कारकेषु कर्म–संज्ञाविधायकं सूत्रमस्ति–

**कर्तुरीप्सिततमं कर्म**

**सूत्रार्थः** – कर्तुः, स्वव्यापारद्वारा, ईप्सिततमम्– **आप्तुम्**=सम्बद्धुम् इष्टतमम्, कारकं सत् कर्मसंज्ञकं भवति।

**उदाहरणम्** – **१. माता भोजनं पचति।**

कर्त्री माता स्वीय–पचनव्यापारस्य फलत्वेन ‘भोजनेन’ अत्यन्तं सम्बद्धुम् इच्छति, अतः तत् कर्म।

**२. अहं विद्यालयं गच्छामि।**

कर्ता अहम्, मदीय–उत्तरदेशसंयोगानुकूलव्यापारस्य फलत्वेन ‘विद्यालयेन’ सह अत्यन्तं सम्बद्धुम् इच्छामि, अतः तत् कर्म।

# कर्मसंज्ञाविधायकसूत्रस्य पदकृत्यम् : -

'कर्तुरीप्सिततमं कर्म' इति सूत्रे–

❖ **'कर्तुः' इति पदं किमर्थम्? माषेषु अश्वं बध्नाति।**

अत्र सूत्रे यदि 'कर्तुः' इति पदं न स्यात्, तर्हि– यथा कर्तुः स्वव्यापारेण ईप्सिततमस्य कर्मसंज्ञा, तथैव अन्येषामपि कारकाणाम् ईप्सिततमस्य 'कर्मसंज्ञां' प्राप्नुयात्। तेन– **'माषान् अश्वं बध्नाति'** इत्यापद्येत।

**कर्मण ईप्सिता माषा, न तु कर्तुः** –

**देवदत्तः माषेष्वश्वं बध्नाति**– अत्र कर्तुः देवदत्तकर्त्री बन्धनात्मकव्यापारेण आप्तुम् इष्टतमस्य अश्वस्य कर्मत्वं तु भवत्येव, तेनैव साकं कर्मणः = अश्वस्य इष्टतमानां माषाणाम् अपि कर्मसंज्ञा प्राप्नुयात्, तन्मा भवतु एतदर्थं 'कर्तुः' इति पदम्।

जिज्ञासा- सूत्रे तमब्ग्रहणं किमर्थम्?

समाधानम्- 'पयसा ओदनं भुङ्क्ते' इति
वाक्ये पयः मा स्यात्।

जिज्ञासा- 'अधिशीङ्स्थासां कर्म' इत्यतः
'कर्म' इत्यनुवृत्तौ पुनः कर्मग्रहणं
किमर्थम्?

समाधानम्- आधारनिवृत्त्यर्थम्। अन्यथा 'गेहं
प्रविशति' इत्यत्रैव स्यात्।